श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये अष्टमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये अष्टमं दशकम् ॥

## प्रलयवर्णनं, जगत्सृष्टिप्रकारवर्णनं च

एवं तावत् प्राकृतप्रक्षयान्ते
ब्राह्मे कल्पे ह्यादिमे लब्धजन्मा।
ब्रह्मा भूयस्त्वत्त एवाप्य वेदान्
सृष्टिं चक्रे पूर्वकल्पोपमानाम् ॥ **8.1** ॥

सोऽयं चतुर्युगसहस्रमितान्यहानि
तावन्मिताश्च रजनीर्बहुशो निनाय।
निद्रात्यसौ त्वयि निलीय समं स्वसृष्टै -
र्नैमित्तिकप्रलयमाहुरतोऽस्य रात्रिम् ॥ **8.2** ॥

अस्मादृशां पुनरहर्मुखकृत्यतुल्यां
सृष्टिं करोत्यनुदिनं स भवत्प्रसादात्।
प्राग्ब्राह्मकल्पजनुषां च परायुषां तु
सुप्तप्रबोधनसमास्ति तदाऽपि सृष्टिः ॥ **8.3** ॥

पञ्चाशदब्दमधुना स्ववयोर्धरूप -
मेकं परार्धमतिवृत्य हि वर्ततेऽसौ।
तत्रान्त्यरात्रिजनितान् कथयामि भूमन्
पश्चाद्दिनावतरणे च भवद्विलासान् ॥ **8.4** ॥

दिनावसानेऽथ सरोजयोनिः
सुषुप्तिकामस्त्वयि सन्निलिल्ये।

जगन्ति च त्वज्जठरं समीयु -
स्तदेदमेकार्णवमास विश्वम्॥ **8.5**॥

तवैव वेषे फणिराजि शेषे
जलैकशेषे भुवने स्म शेषे।
आनन्दसान्द्रानुभवस्वरूपः
स्वयोगनिद्रापरिमुद्रितात्मा॥ **8.6**॥

कालाख्यशक्तिं प्रलयावसाने
प्रबोधयेत्यादिशता किलादौ।
त्वया प्रसुप्तं परिसुप्तशक्ति -
व्रजेन तत्राखिलजीवधाम्ना॥ **8.7**॥

चतुर्युगाणां च सहस्रमेवं
त्वयि प्रसुप्ते पुनरद्वितीये।
कालाख्यशक्तिः प्रथमप्रबुद्धा
प्राबोधयत्त्वां किल विश्वनाथ॥ **8.8**॥

विबुध्य च त्वं जलगर्भशायिन्
विलोक्य लोकानखिलान् प्रलीनान्।
तेष्वेव सूक्ष्मात्मतया निजान्तः -
स्थितेषु विश्वेषु ददाथ दृष्टिम्॥ **8.9**॥

ततस्त्वदीयादयि नाभिरन्ध्रा -
दुदञ्चितं किञ्चन दिव्यपद्मम्।
निलीननिश्शेषपदार्थमाला -
सङ्क्षेपरूपं मुकुलायमानम्॥ **8.10**॥

तदेतदम्भोरुहकुड्मलं ते
कलेबरात् तोयपथे प्ररूढम्।

बहिर्निरीतं परितः स्फुरद्भिः
 स्वधामभिर्ध्वान्तमलं न्यकृन्तत् ॥ **8.11** ॥

सम्फुल्लपत्रे नितरां विचित्रे
 तस्मिन् भवद्वीर्यधृते सरोजे।
स पद्मजन्मा विधिराविरासीत्
 स्वयम्प्रबुद्धाखिलवेदराशिः ॥ **8.12** ॥

अस्मिन् परात्मन् ननु पाद्मकल्पे
 त्वमित्थमुत्थापितपद्मयोनिः।
अनन्तभूमा मम रोगराशिं
 निरुन्धि वातालयवास विष्णो ॥ **8.13** ॥

॥ इति श्रीमन्नारायणीये अष्टमं दशकं समाप्तम् ॥